# संस्कृत वार्ता:

दिनाङ्क : - 03/07/2026 सायम् : - 06:20

<u>आदौ मुख्यवार्ता:</u>

- आतङ्कवादं प्रति पाकिस्तानपक्षतः अविरतं क्रियमाणं पोषणं मत्वा, भारतेन सिन्धु-जलसन्धिः स्थगितावस्थायाम् एव रक्षितुं पुनः स्वप्रतिज्ञा दृढीकृता।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना पवित्रा अमरनाथयात्रा राष्ट्रस्य आध्यात्मिकपरम्परायाः सांस्कृतिक एकतायाः च कश्चन 'शाश्वतम् अध्यायम्' इति व्याहृता; यात्राप्रसङ्गे गच्छद्भ्यः सर्वेभ्यः श्रद्धालूभ्यः प्राकटिताः शुभाशंसाः।
- केन्द्रीय-वित्तमन्त्रिणा निर्मलासीतारमणेन 'विकसितभारतस्य गौरवपूर्ण-लक्ष्ययात्रायै फ्रांस-देशस्य निवेशकाः सोत्साहम् आहूता; उभयोः देशयोः पारस्परिक-समृद्धेः प्राप्तये, रणनीतिक-संधेः सुदृढीकरणाय च विशेषं बलं दत्तम्।
- भूकम्पपीडिते वेनेजुएला देशे मृतानां सङ्ख्या द्विसहस्राधिकं जाता, सहस्रशः जनाः अद्यापि अज्ञाताः सन्ति; भारतेन तत्र 'ऑपरेशन अमिस्ताद' इत्यस्याभियानस्य अन्तर्गतं मानवीय-सहायता-कार्याणि तीव्रीकृतानि।
- भारतीय-ऋतु-विज्ञान विभागेन श्वः यावत् गुजरात-गोवा-मध्य-महाराष्ट्ओड़िशा-मध्यप्रदेशस्य च कतिपयक्षेत्रेषु अतिवृष्टेः संचेतना प्रख्यापिता।
- फीफा विश्वकप क्रीडा मालिकायाम् केनडा-देशस्य वैंकूवर-नगरे स्विट्जरलैंड-देशेन अल्ज़ीरिया-देशः द्वे-शून्यं इत्यङ्कान्तरालैः पराजित्य राउण्ड-ऑफ-१६-चक्रे प्रवेशः सम्प्राप्तः।

---------------------------------------------------

<u>सिन्धु-जलसन्धिः</u>

अद्य सायं नवदेहल्यां आयोजितं वार्ताहर-सम्मेलनं सम्बोधयन् भारतेन पुनः सबलं प्रतिपादितं यत् पाकिस्तान-प्रशासनपक्षतः प्रचलमानस्य आतङ्कवादस्य निरन्तर-पोषकत्वात् सिन्धु-

जलसन्धिः स्थगितावस्थायाम् एव वर्तते। विदेश-मन्त्रालयस्य प्रमुखाधिकारिक-प्रवक्ता रणधीर जायसवालः प्रावोचत् यत् सिन्धु-जलसन्धेः विषये भारतस्य नीतिः सर्वथा स्पष्टा अस्ति। तेन गदितं यत् पाकिस्तानेन प्रथमतः आतङ्कवादं प्रति स्वकीयं समर्थनं सर्वथा परित्यक्तव्यम्। तीस्ता-नदी समग्र-प्रबन्धन-पुनरुद्धार-परियोजनायाः विषये श्रीजायसवालेन स्पष्टीकृतं यत् बाङ्गलादेशे विकास-परियोजनाभ्यः दीयमाना भारतस्य साहाय्यता कश्चन पारस्परिक-सम्मति-प्राप्तं मार्गचित्रम् आधृत्य वर्तते, यस्य नियतकाले समीक्षा विधीयते। तेन प्रोक्तं यत् तीस्ता-नदी-परियोजनायाम् भारतस्य चिन्तनं पूर्वमेव बाङ्गलादेशं प्रति ज्ञापितम् , सहैव भारतं तीस्ता-विषये स्वकीये चिन्तने सर्वान् सम्बद्ध-घटनाक्रमान् संयोजयिष्यति।

-----------------------------------------------

<u>अमरनाथयात्रां</u>

प्रधानमन्त्री नरेन्द्रमोदी प्रतिवर्षं प्रवर्तमानां पवित्र- अमरनाथयात्रां राष्ट्रस्य आध्यात्मिकपरम्परायाः सांस्कृतिक-एकतायाः च कश्चन 'शाश्वतम् अध्यायम्' व्यपादिशत्। तेन प्रोदीरितं यत् भगवतः 'बाबा-बर्फानी' इत्यस्य दिव्यमिदं दर्शनं कोटिशः श्रद्धालूनां जीवने एकः अविस्मरणीयः, अत्यन्तं मङ्गलमयश्चानुभवो वर्तते। अनेन सहैव सः जम्मू-काश्मीरक्षेत्रे वार्षिकयात्रां कुर्वद्भ्यः तीर्थयात्रिभ्यः हार्दिक्यः शुभाशंसाः प्राकटयत्। श्रद्धालून् प्रति प्रेषिते पत्रे प्रधानमन्त्रिणा अस्यां पावनयात्रायां पञ्च-सङ्कल्पानां परिपालनार्थम् अभ्यर्थना विहिता। एते सङ्कल्पाः सन्ति - शुचितायाः सर्वथा संरक्षणम्, सुरक्षा-नियमानां निष्ठापूर्वकम् अनुपालनम्, स्थानीय-स्वदेशीयोत्पादनानां संवर्धनम्, रक्षाबन्धनपर्वणि भगिन्यै/भ्रात्रे वा पादपस्य उपहारप्रदानम्, तथा 'विकसित-भारतस्य' राष्ट्रियसङ्कल्पाय स्वयोगदानम्। अद्य प्रातःकालात् विधिपूर्वकम् आरब्धा इयं 'श्री अमरनाथयात्रा' 'नुनवान-पहलगाम' तथा 'बालटाल' इति द्वाभ्यामेव मार्गाभ्याम् अतीव सुचारुरूपेण, निर्बाधं च अग्रे प्रवर्धते।

-----------------------------------------------

## वित्तमन्त्री

केन्द्रीय-वित्तमन्त्री निर्मला सीतारमण न्यगादीत् यत् भारत-फ्रांसयोः रणनीतिक-संधिः शाश्वत-दृढ-नवोन्मेष-प्रेरित-विकासस्य दिशि सर्वथा सर्वोत्कृष्टं स्थानं भजते। पेरिस-नगरे आयोजितं भारत-फ्रांस व्यापार सम्मेलनं सम्बोधयन्त्या तया सप्रमाणं प्रतिपादितं यत् प्राविधिक-प्रगतेः, आपूर्ति-शृङ्खलायाः वैविध्यीकरणस्य, ऊर्जा-सङ्क्रमणस्य, भू-राजनैतिक-उद्भव-परिवर्तनानां च कारणात् वैश्विक-अर्थव्यवस्था तीव्रगत्या परिवर्तमाना अस्ति। वित्तमन्त्रिणा फ्रांस-देशस्य वाणिज्य-नेतारः निवेशकाश्च विकसित भारतमिति राष्ट्रिय-सङ्कल्पस्य महायात्रायां भारतस्य सहयात्रिणः भवितुं सोत्साहम् आहूताः।

---------------------------------------------------

## ऑपरेशन-अमिस्ताद

भारतेन ऑपरेशन-अमिस्ताद इत्यस्यान्तर्गतं भूकम्प-ग्रस्ताय वेनेजुएला-देशाय स्वकीया मानवीया सहायता प्रेषिता। विदेश-मन्त्रालयेन सामाजिक-सञ्जालीय-तन्त्रे प्रचलितस्य चिकित्सा-कार्यस्य चित्राणि प्रसारयता समुल्लिखितं यत् भारतीय-सेना-क्षेत्र-चिकित्सालयः प्रभावितेषु समुदायेषु निरन्तरं चिकित्सा-सेवाः प्रयच्छति। वेनेजुएला-स्थितेन भारतीय-दूतावासेन कथितं यत्, अस्मिन् दक्षिण-अमेरिकी-राष्ट्रे भारतस्य व्यावसायिक-सेवा-गुणवत्तायाः जनसामान्यैः भूरिशः प्रशंसा कृता। वेनेजुएला-देशस्य कार्यवाहक-राष्ट्रपतिः डेल्सी रोड्रिगेज इत्येषा सप्तदिवसीयस्य राष्ट्रिय-शोकस्य घोषणां कृतवती अनेन भीषण-भूकम्पेन मृतानां सङ्ख्या पञ्चनवत्यधिक-पञ्चशतोत्तर-द्विसहस्रं सञ्जाता। सहैव द्वादश-सहस्राधिकाः जनाः आहताः अत्रान्तरे एकोन-नवत्यधिकैकशतं नष्टीभूतानि। अधिकारिणामनुसारं सहस्रशः जनाः अद्यापि निरुद्दिष्टाः सन्ति, सहैव क्षेत्रे च आपदुद्धरणकार्याणि निरन्तरं प्रचलन्ति।

---------------------------------------------------

## कोलकाता कार्यक्रम

पश्चिमबङ्गाल-विधानसभायाः नवनिर्वाचितानां सदस्यानां कृते आयोजितस्य द्विदिवसीय-अभिविन्यास-कार्यक्रमस्य अद्य कोलकातायाः न्यू टाउन कन्वेंशन केन्द्रे लोकसभाध्यक्षेण ओम् बिडला इत्यनेन विधिवत् उद्घाटनं विहितम्। उद्घाटनसमारोहात् प्रागेव लोकसभाध्यक्षाय ओम्

बिडला वर्याय 'गार्ड ऑफ ऑनर' इति राष्ट्रिय-सम्मान-प्रणामः समर्पितः। उद्घाटन-सत्रं सम्बोधयन् लोकसभाध्यक्षः ओम् बिडला प्रावोचत् यत् विधायकानां कृते विधिनिर्माण-प्रक्रियायाः तन्त्रस्य च गभीर-ज्ञानस्यावश्यकता अस्ति एव अनेन सहैव विधायकेभ्यः प्रत्यग्र-प्रौद्योगिक्याः, नवोन्मेषस्य , कृत्रिम-बुद्धिमत्तायाः, अंकीय-प्रौद्योगिक्याः च प्रभावीरूपेण उपयोगः करणीयः, यतः एषः समयस्य महती आवश्यकता वर्तते।

------------------------------------------------

**ऋतुविज्ञानम्**

भारतीय-ऋतु-विज्ञान-विभागेन गुजरात-कोङ्कण-गोवा-मध्यमहाराष्ट्र-ओडिशा-पश्चिममध्यप्रदेशेषु श्वः यावत् अतिवृष्टेः रक्तसञ्चेतना प्रसारिता। अनेनैव सह छत्तीसगढ-पूर्वमध्यप्रदेश-उत्तरप्रदेश-विदर्भ-क्षेत्रेषु झञ्झावातस्य विद्युत्-प्रपातस्य चापि सम्भावना प्रकटीकृता। विभागानुसारं श्वः यावत् उत्तरप्रदेश-बिहार-आन्ध्रप्रदेश--पश्चिमबङ्गाल-कर्नाटक-जम्मू-कश्मीर-लद्दाख-तमिलनाडु-पुदुच्चेरी-कारैकाल-तेलंगाना-पूर्वोत्तरराज्येषु अपि अत्यधिक-वृष्टिः भवितुं शक्या।तथा च छत्तीसगढ-तटीयकर्नाटक-पूर्वीयराजस्थान-हिमाचलप्रदेश-केरल-माहे-उत्तराखण्ड-क्षेत्रेषु अपि यथावस्थमेव स्थितिः स्थास्यति। अपरपक्षे, ऋतु-विभागेन प्रोक्तं यत् अरुणाचलप्रदेश-असम-मेघालय-राज्येषु आगामी-सोमवासर-पर्यन्तं ग्रीष्म-आर्द्र-वातावरणं अनुभविष्यते।

------------------------------------------------

**क्रीडा**

फीफा विश्वचषके केनडा-देशस्य वैंकूवर-नगरे स्विट्जरलैंड-देशेन अल्ज़ीरिया-देशः द्वे-शून्यं इत्यङ्कान्तरालैः पराजित्य राउण्ड-ऑफ-१६-चक्रे प्रवेशः सम्प्राप्तः। इतिहासे चतुर्थवारं प्रागुपान्त्यचरणे गन्तुं स्विट्जरलैंड-दलम् आगामि-मङ्गलवासरे अस्मिन्नेव स्थाने कोलम्बिया अथवा घाना-देशेन सह स्पर्धिष्यति। अन्यस्मिन् द्वन्द्वे स्पेन-देशेन कैलिफोर्नियायाः लॉस एंजिल्स -क्रीडाङ्गणे राउण्ड-ऑफ-३२-चक्रे ऑस्ट्रिया-दलं त्रि-शून्यं इत्यनेन पराभूय '

राउण्ड-ऑफ-१६-चक्रे स्वस्थानं सुरक्षितम्। अपरत्र, केनडा-देशस्य टोरंटो-नगरे प्रवृत्ते द्वन्द्वे पुर्तगाल-देशः अपि क्रोएशिया-दलं द्वे-शून्यं इत्यङ्कान्तरालैः पराजित्य राउण्ड-ऑफ-१६-चक्रे प्राप्तवान्। मङ्गलवासरे डलास-नगरे राउण्ड-ऑफ-१६-चक्रे पुर्तगाल-दलं स्पेन-देशं सम्मुखीकरिष्यति।

।। इति वार्ता: ।।